**संस्कृत वार्ता:**

**दिनाङ्क : 26/04/2026**

**<u>आदौ मुख्यवार्ता:</u>**

- प्रधानमन्त्रिणा नरेन्द्रमोदिना कलपक्कम्-नगरे फास्ट-ब्रीडर-रिएक्टर इत्यस्य क्रान्तिकता प्राप्तये परमाणु-वैज्ञानिकानां भूरिशः प्रशंसा कृता ।

- आकाशवाण्याः मन की बात इति कार्यक्रमे प्रधानमन्त्रिणा जनगणना-अभियाने जन-सहभागितायै आह्वानं कृतम् तेन आश्वासितं यत् प्रदत्ताः सूचनाः पूर्णतया सुरक्षिताः भविष्यन्ति।

- पश्चिमबङ्गाल-राज्ये द्वितीयान्तिम-चरणस्य मतदानाय राजनैतिक-प्रचारः चरमोत्कर्षे; वरिष्ठाः नेतारः मतदातॄन् आक्रष्टुं सर्वविध-प्रयत्नान् कुर्वन्ति।

- **अपि च**

- आई.पी.एल. क्रिकेट्-क्रीडायां चेन्नई-सुपर-किंग्स, गुजरात-टाइटन्स- दलयो: मध्ये क्रीडा सम्प्रति प्रचलति। दिवसस्य अन्यस्यां स्पर्धायां लखनऊ-सुपर-जायन्ट्स-दलं कोलकाता-नाईट-राईडर्स-दलं सम्मुखी करिष्यति।

**<u>अथ वार्ता: विस्तरेण</u>**

**<u>प्रधानमन्त्री- मन की बात</u>**

प्रधानमन्त्री नरेन्द्रमोदी अद्य देशस्य परमाणु-वैज्ञानिकान् प्राशंसत् यैः तमिलनाडु-राज्यस्य कल्पक्कम-नगरे फास्ट-ब्रीडर-रिएक्टर इत्येतत् क्रान्तिकतां प्रापयित्वा देशस्य गौरवं वर्धितम्।

आकाशवाण्याः मन की बात इति कार्यक्रमे राष्ट्रं सम्बोधयन् श्रीमोदी अवदत् यत् क्रिटिकैलिटी सा स्थितिः वर्तते यस्यां कोऽपि परमाणु-संयन्त्रं प्रथमवारं स्वयमेव निरन्तरं परमाणु-शृङ्खला-अभिक्रियायां सफलं भवति। एषा स्थितिः रिएक्टर-यन्त्रस्य कार्यान्वयन-चरणे प्रवेशस्य प्रतीकभूता विद्यते।

प्रधानमन्त्रिणा एतत् भारतस्य परमाणु-ऊर्जा-यात्रायां ऐतिहासिक- सोपानत्वेन वर्णितम्। तेन सबलं प्रोक्तं यत् अयं परमाणु-रिएक्टर इत्येतत् पूर्णतया स्वदेशी-तन्त्रज्ञानेन निर्मितः।

अत्रावसरे प्रधानमन्त्रिणा प्रवर्तमानस्य जनगणना-अभियानस्य विषयेऽपि प्रकाशितम्। तेनोदीरितं यत् प्रत्येक-भारतीयेन विश्वस्य बृहत्तमस्यास्य जनगणना-अभियानस्य विषये ज्ञातव्यम् । श्रीमोदिना कथितं यत् सप्तविंशत्यधिक-द्विसहस्रतमस्य जनगणना पूर्णतया डिजीटल-रूपेण आयोज्यते, यत्र सर्वाः सूचनाः साक्षात् प्राङ्कीय-माध्यमेन सङ्गृहीताः भविष्यन्ति। सः देशवासिभ्यः अस्यां प्रक्रियायां भागं ग्रहीतुं तथा च अस्य अभियानस्य साफल्यं सुनिश्चेतुं अभ्यर्थितवान्।

श्रीमोदी प्रावोचत् यत् मई-मासस्य आरम्भः बुद्ध-पूर्णिमा इत्याख्येन पावन-पर्वणा सह जायते । सः सर्वानपि शुभाकामनां प्रयच्छन् अवदत् यत् भगवतः सन्देशः अद्यत्वेऽपि अत्यन्तं प्रासङ्गिकं वर्तते।

एतदतिरिच्य तेन पूर्वोत्तर-भारतस्य वंश-तृण-क्षेत्रे प्राप्त-साफल्यस्य विषयेऽपि चर्चा कृता। सः कथितवान् यत् पूर्वं यत् भार-रूपेण प्रतीयते स्म, तदधुना उद्योग-नवाचार-वृत्तिषु च नवीनां शक्तिं प्रयच्छति।

अन्ते प्रधानमन्त्रिणा फ्रान्स-देशस्य बोर्डो-नगरे आयोजितायां यूरोपियन-गर्ल्स-मैथेमैटिकल-ओलम्पियाड-स्पर्धायां षष्ठं स्थानं प्राप्तवतः भारतीय-दलस्य प्रशंसा कृता। अस्मिन् प्रातिभयुक्ते दले मुम्बईय्याः श्रेया मुन्धरा, तिरुवनन्तपुरम् इत्याख्यस्य सञ्जना चाको, चेन्नई-नगरस्य शिवानी भरत कुमारः तथा च कोलकातायाः श्रीमयी बेरा इत्येताः सम्मिलिताः आसन्।

**<u>प्रधानमंत्री-सिक्किम यात्रा</u>**

प्रधानमन्त्री नरेन्द्रमोदी श्वः आरभ्य सिक्किम्-राज्यस्य द्विदिवसीय-यात्रायां भविष्यति। मङ्गलवासरे, प्रधानमन्त्री गङ्गटोक्-नगरस्य आर्किडेरियम्-इत्यत्र गमिष्यति, यत्र राज्यस्य पारिस्थितिक-पुष्प-परम्परां प्रदर्शयितुं विश्व-स्तरीय-आर्किड्-अनुभव-केन्द्रम् अस्ति। सः पलजोर-क्रीडाङ्गणे सिक्किम-राज्यस्य पञ्चशत्तमस्य राज्यत्व-उत्सवस्य समापनसमारोहे अपि भागं ग्रहीष्यति। अस्मिन् अवसरे, श्रीमोदी सम्पूर्णे राज्ये चतुःसहस्रकोटिरूप्यकाणां बहुविधविकासपरियोजनानां उद्घाटनं, शिलान्यासं लोकार्पणं च करिष्यति।

**<u>विराम</u>**

**संस्कृतवार्तायाः संस्करणमिदम् इदानीम् आकाशवाणीतः प्रसार्यते। सममेव अयं कार्यक्रमः आकाशवाण्याः अन्तर्जालपटले <u>www.newsonair.gov.in</u> इत्यत्र, अथ newsonair चलदूरभाषीय- तन्त्रांशे अपि उपलब्धो भविष्यति।**

**<u>पश्चिमबंगाल चुनाव प्रचार</u>**

पश्चिमबङ्गालराज्ये विधानसभानिर्वाचनस्य द्वितीयान्तिम-चरणाय तीव्र-प्रचारः श्वः समाप्यते अतः प्रमुखाः राजनेतारः मतदातृन् आक्रष्टुम् अन्तिमं प्रयासं कुर्वन्ति। राज्ये द्वितीय-चरणाय मतदानं बुधवासरे भविष्यति। भाजपेति दलस्य वरिष्ठः नेता तथा प्रधानमन्त्री नरेन्द्रमोदी अद्य हुगली-मण्डलस्य आरामबागे, उत्तर-24 परगना-मण्डलस्य बनगांवे च जनसभाम् अभिसंबोधितवान्। श्रीमोदिना उक्तं यत् टी. एम्. सी. इति दलस्य भ्रष्टाचारेण, शासनस्य विफलतया च नागरिकाः त्रस्ताः सन्ति। सः अवदत् यत् तेषां निष्कासनस्य संकल्पः पूर्वापेक्षया अधुना प्रबलः अस्ति। कृषकाणां कल्याणं दलस्य प्रमुखा प्राथमिकता अस्ति इति प्रवदन्, श्रीमोदी अवदत् यत् भाजपेति दलस्य नेतृत्वे केन्द्र-सर्वकारेण जूट् इत्यस्य न्यूनतमसमर्थनमूल्यं (एम्. एस्. पि.) इति द्विगुणी कृतम्, क्रयणं त्रिगुणं यावत् वर्धितम्, गोधूमस्य तण्डुलस्य च कृते जूट्- पोट्टलीकरणम् अनिवार्यं च कृतम् अस्ति, तथा च पश्चिमबङ्गालराज्ये जूट्-यन्त्रागारानां आवश्यकतां वर्धयितुं, प्रथम-प्रयोग-प्ल्यास्टिक् इत्यस्य प्रतिबन्धः कृतः।

तृणमूल्-काङ्ग्रेस्-दलस्य वरिष्ठा नेत्री ममता-बनर्जी अधिकतया स्वनिर्वाचनक्षेत्रे भवानीपुरे एवास्ति, यत्र बहुविधकार्यक्रमाः निर्धारिताः सन्ति। दलस्य महासचिवः अभिषेक बनर्जी इत्येषः पूर्बा-बर्धमान-मण्डलस्य पूर्वास्थली-उत्तर इत्यत्र जनसभाम् अकरोत्।

अवधेयं यत् अस्मिन् मासे त्रयोविंशति दिनाङ्के राज्ये प्रथमस्य चरणस्य मतदानं सम्पन्नम् अभवत्।
केरलम्, तमिलनाडु, असम, पुदुच्चेरी-केन्द्रशासितप्रदेशेषु च आयोजितानां विधानसभा-निर्वाचनानां मतानां गणना, पश्चिमबङ्गालराज्यस्य द्वितीय-चरणीय-मतदानेन सहैव मई-मासस्य चतुर्थे दिनाङ्के भविष्यति।

## गुजरात-मतदानम्

गुजरात-राज्ये अद्य पञ्चदश-नगरनिगमानां, चतुरशीतिः नगरपालिकानां तथा च द्विशताधिक-जनपद-तालुका-पञ्चायतानां स्थानीय-निकायानां च निर्वाचनाय  मतदानं प्रचलति।राज्य-निर्वाचनायोगेन मतदान-प्रक्रियायाः व्यवस्थित-सम्पादनाय अष्टचत्वारिंशत्-सहस्र-मतदान-केन्द्रेषु सुरक्षायाः व्यापकप्रबन्धाः कृताः । मतदानं अद्य सायङ्काले षड्वादन-पर्यन्तं प्रचलिष्यति। मतगणना च एप्रिल-मासस्य अष्टाविंशति दिनाङ्के निर्धारिता।

## अजीत डोभाल - यूएई

राष्ट्रिय-सुरक्षा-परामर्शदः अजित-डोभालः संयुक्त-अरब्-अमीरात्-देशस्य राष्ट्रपतिना मोहम्मद्-बिन्-जायद्-अल्-नहयानेन सह मिलितवान्। सामाजिकान्तर्जालीयपटले लिखिते एकस्मिन् सन्देशे यु. ए. ई. स्थितेन भारतीय-दूतावासेन उक्तं यत् उभौ पक्षौ समग्र-सामरिक-सहभागित्वस्य, क्षेत्रीय-स्थितिं, उभयोः देशयोः मध्ये परस्पर-हितानां अन्यान् विषयान् च गहनं कर्तुं उपायेषु चर्चा अभवत्।

## ऋतु-विभाग

भारत-ऋतु-विभागेन आगामिषु त्रिषु दिनेषु देशस्य वायव्य-मध्यभागेषु

उष्णतरङ्गस्य स्थितेः तथा उष्णतरङ्गे न्यूनतायाः च संभावना प्रकटिता अस्ति। विभागस्य अनुसारं, जम्मू-कश्मीर्, लद्दाख्, हिमाचलप्रदेश, उत्तरप्रदेश, पञ्जाब, हरियाणा, चण्डीगढ, दिल्ली इत्येतेषु प्रदेशेषु श्वः यावत् उष्णतरङ्गस्य

स्थितिः भविष्यति। ऋतुविभागेन श्वः ओडिशा-राज्ये, बुधवासरपर्यन्तं तमिळनाडु-पुदुचेरी-करैकल-प्रदेशेषु च पृथक्-पृथक् क्षेत्रेषु उष्ण-आर्द्र-ऋतोः पूर्वानुमानं प्रकटितम्।

## आई.पी.एल

आई.पी.एल. क्रिकेट्-क्रीडायां चेन्नई-सुपर-किंग्स, गुजरात-टाइटन्स- दलयो: मध्ये क्रीडा सम्प्रति प्रचलति। चेन्नई-सुपर-किंग्स-दलेन गुजरात-टाइटन्स-दलस्य सम्मुखे ऊनषष्ठ्यधिकैकशत-धावनांकानां लक्ष्यं स्थापितम्।

तत्रैव अन्यस्यां स्पर्धायां लखनऊ-सुपर-जायन्ट्स-दलं कोलकाता-नाईट-राईडर्स-दलं सम्मुखी करिष्यति।

**।। इति वार्ता: ।।**